गृत्समद (आङ्गिरसः शौनहोत्रः पश्चाद्) भार्गवः शौनकः।अग्निः। त्रिष्टुप्

**जो॒हूत्रो॑ अ॒ग्निः प्र॑थ॒मः पि॒तेवे॒ळस्प॒दे मनु॑षा॒ यत्समि॑द्धः।**
**श्रियं॒ वसा॑नो अ॒मृतो॒ विचे॑ता मर्मृ॒जेन्यः॑ श्रव॒स्य१॒ः स वा॒जी॥ २.०१०.०१**

जोहूत्रः- ह्वातव्यः। अग्निः- पावकः सर्वभूतहितक्रतुः। प्रथमः- मुख्यः। इळस्पदे- यज्ञसदने। मनुषा- मनुष्यैः। समिद्धः- सम्यगुद्दीपितः। श्रियं वसानः- कल्याणः। अमृतः- मरणरहितः। विचेताः- विशेषचेतनः। मर्मृजेन्यः- शोधकः। श्रवस्यः- श्रुतिमान्। सः- असौ। वाजी- गतिमान् ॥१ ॥

**श्रू॒या अ॒ग्निश्चि॒त्रभा॑नु॒र्हवं॑ मे॒ विश्वा॑भिर्गी॒र्भिर॒मृतो॒ विचे॑ताः।**
**श्या॒वा रथं॑ वहतो॒ रोहि॑ता वो॒तारु॒षाह॑ च॒क्रे विभृ॑त्रः॥ २.०१०.०२**

विश्वाभिः- सर्वैः। गीर्भिः- मन्त्रैः। अमृतः- अमृतस्वरूपः। विचेताः- विशेषचित्तयुक्तः। चित्रभानुः- असाधारणप्रकाशः। अग्निः। मे- मम। हवम्- आह्वानम्। श्रूयाः- शृणोतु। श्यावा रोहिता अरुषा- नानावर्णाश्वौ। रथं वहतः- त्वद्वाहनं वहतः। विभृत्रः- विशेषधारकोग्निः। चक्रे- अस्मदर्थं कर्म करोति ॥२ ॥

**उ॒त्ता॒नाया॑मजनय॒न्सुषू॑तं॒ भुव॑द॒ग्निः पु॑रु॒पेशा॑सु॒ गर्भः॑।**
**शिरि॑णायां चिद॒क्तुना॒ महो॑भि॒रप॑रीवृतो वसति॒ प्रचे॑ताः॥ २.०१०.०३**

उत्तानायाम्- उत्थितभावनायां दैवप्रज्ञायाम्। सुषूतम्- सुनिष्पन्नम्। अजनयन्- उत्पादयन्त्युपासकाः। अग्निः- क्रतुः। पुरुपेशासु- बहुरूपयुक्तभावनासु। गर्भः- अन्तर्हितः। भुवत्- भवति। शिरिणायाम्- निशि मनुष्यप्रज्ञायामपि। अक्तुना- अन्धकारेण। अपरीवृतः- अनाक्रमितः। महोभिः- महद्भिः स्वतेजोभिः। प्रचेताः- प्रकृष्टचेतनः। वसति- निवसति ॥३ ॥

WEBOLIM

**जिघर्म्यग्निं हविषा घृतेन प्रतिक्षियन्तं भुवनानि विश्वा।**

**पृथुं तिरश्चा वयसा बृहन्तं व्यचिष्ठमन्नै रभसं दृशानम्॥ २.०१०.०४**

घृतेन- पूतनवनीतोपलक्षितपूतभावनाख्येन। हविषा। विश्वा- सर्वेषु। भुवनानि- लोकेषु। प्रतिक्षियन्तम्- निवसन्तम्। पृथुम्- महान्तम्। तिरश्चा- सर्वतः। वयसा- हव्येन। बृहन्तम्- प्रवृद्धम्। व्यचिष्ठम्- व्याप्तम्। अन्नैः- हव्यैः। रभसम्- बलिनम्। दृशानम्- सुदर्शनम्। अग्निम्- वैश्वानरम्। जिघर्मि- उद्दीपयामि ॥४ ॥

**आ विश्वतः प्रत्यञ्चं जिघर्म्यरक्षसा मनसा तज्जुषेत।**

**मर्यश्रीः स्पृहयद्वर्णो अग्निर्नाभिमृशे तन्वा३जर्भुराणः॥ २.०१०.०५**

आ- समन्तात्। विश्वतः- सर्वतः। प्रत्यञ्चम्- प्रत्यागच्छन्तम्। जिघर्मि- उद्दीपयामि। अरक्षसा- निःस्वार्थेन। मनसा- चित्तेन। तत्- तच्छुद्धं भावनम्। जुषेत- सेवेत। मर्यश्रीः- मर्त्याश्रयः। स्पृहयद्वर्णः- स्पृहणीयकान्तिः। तन्वा- स्वदेहेन। जर्भुराणः- ज्वलन्। अग्निः। नाभिमृशे- रक्षसा मनसा स्प्रष्टुं न शक्यो भवति ॥५ ॥

**ज्ञेया भागं सहसानो वरेण त्वादूतासो मनुवद्वदेम।**

**अनूनमग्निं जुह्वा वचस्या मधुपृचं धनसा जोहवीमि॥ २.०१०.०६**

वरेण- श्रेष्ठया स्वज्वालया। सहसानः- रक्षांस्यभिभवन्। भागम्- अस्मद्दत्तहविर्भागम्। ज्ञेयाः। त्वादूतासः- त्वां दूतं कुर्वाणा वयम्। मनुवत्- ज्ञानवन्मन्त्रम्। मन ज्ञाने। वदेम- ब्रूमः। वचस्या- मन्त्रकामया। जुह्वा- ज्वालया। अनूनम्- अदभ्रम्। मधुपृचम्- रससंयोजकम्। अग्निम्- पावकं क्रतुमित्याध्यात्मिके। धनसाः- हव्यसम्भक्ता सन्। जोहवीमि- आह्वयामि ॥६ ॥

Dr. Ranganj

WEBOLIM